Digitized by Arya Samaj Foundation Chennai and eGangotri

228
6

A
24
AS-A

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ओ३म् ।

सा० संख्या 224/6 पंजिका संख्या

पुस्तकों पर सर्वप्रकार की निशानियां लगाना अनुचित है ।

कोई विद्यार्थी पन्द्रह दिन से अधिक पुस्तक नहीं रख सकता ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४२४५६

-6 MAY 1970
A2351

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CHECKED 1973
Initial

आशौचनिर्णयः प्रारभ्यते

COMPILED

RA 224,AAS-A
42954

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीगणेशाय नमः ॥ ॥ गणाधिपं नमस्कृत्य प्रत्यू-
हाद्रिपविं कविम् ॥ त्र्यंबकेणाशुबोधाय क्रियते-
ऽशौचनिर्णयः ॥ १ ॥ अर्थतः शब्दतश्चेह पौनरु-
क्त्यं न दुष्यति॥स्फुटबोधाय बालानां ग्रंथोऽयं रच्य-
ते यतः ॥२॥ अत्र प्रागुपनयनात्कामचारकामवाद-
कामभक्षा इति गौतमोक्तेरनुपनीतस्य पित्रादिसं-
स्कारं विनाऽशौचे नाधिकारः ॥ उपनयनोत्तरमपि
ब्रह्मचारिणः पित्राद्यंतकर्मकरण एवाशौचाधिका-
रो नान्यत्र ॥ तस्माद्द्विजानां समावर्तनोत्तरं निरंकु-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शोऽशौचाधिकारः ॥ स्त्रीशूद्रयोस्तु विवाहस्योपनय-
नस्थानापन्नत्वेन विवाहोत्तरमेवाशौचाधिकारः ॥१॥
अथ जननाशौचम् ॥ ॥ गर्भिण्या मासचतुष्टयप-
र्यंतं गर्भनाशः स्राव इत्युच्यते ॥ तदा गर्भिण्या
मासत्रयपर्यंतं त्रिरात्रं चतुर्थमासे चतूरात्रमाशौचं
अस्पृश्यत्वम् ॥ पित्रादिसपिंडानां स्रावमात्रे स्ना-
नाच्छुद्धिः ॥ २ ॥ गर्भिण्याः पंचमषष्ठमासयोर्गर्भ-
नाशः पात इत्युच्यते ॥ तत्र गर्भिण्या मासंख्य-
या पंच षट् च दिनानि क्रमेणास्पृश्यत्वावहमाशौ-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चम् ॥ पित्रादिसपिंडानां तु त्रिरात्रं जननाशौचं मृताशौचं तु नास्ति ॥ इदमेतावत्पर्यंतं सर्ववर्णसाधारणं वयोवस्थानिमित्तत्वात्॥ ३॥ गर्भिण्याः सप्तममासप्रभृति प्रसवे सर्वेषां मातृपित्रादीनां सपिंडानां विप्राणां दशाहम्॥ क्षत्रियाणां द्वादशाहम्॥ वैश्यानां पंचदशाहम् ॥ शूद्राणां मासम् ॥ सच्छूद्रस्य मासार्धम् जननाशौचं मृताशौचं तु नास्ति ॥ सापत्नमातुः सर्वत्र पितृवत् ॥ ४ ॥ जननाशौचे गर्भिण्याः दशाहमस्पृश्यत्वम् ॥ पितुः सापत्नमातुश्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्नानात्प्रागस्पृश्यत्वम्॥स्नानोत्तरं स्पृश्यत्वमेव॥ किंतु सर्वत्र सपिंडानां कर्मानाधिकारमात्रम् ॥ तत्रापि नालच्छेदनात्पूर्वं जातकर्मदानादौ पितुरधिकारः ॥ एवं प्रथमषष्ठदशमदिवसेषु जन्मदाख्यदेवतापूजायां च पितुर्वचनाददधिकारः ॥ कूटस्थमारभ्य सप्तपुरुषपर्यंतं सपिंडाः॥ ततः सप्त सोदकाः॥ततः सप्त सगोत्राः ॥ सोदकानां तु त्रिरात्रमाशौचम् ॥ सगोत्राणां स्नानमात्रम् ॥ ५ ॥ गर्भिण्याः दशाहोत्तरं पुत्रोत्पत्तौ विंशतिदिनानि कन्योत्पत्तौ मासपर्यंतं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कर्मानधिकारः ॥ ६ ॥ इति जननाशौचम् ॥ ॥

अथ मृताशौचम् ॥ ॥ तत्र तद्वतामस्पृश्यत्वं कर्मानधिकारश्चेत्युभयं भवति ॥ मृतजाते शिशौ सर्वेषां सपिंडानां दशाहं जननाशौचं मृताशौचं तु नास्ति ॥ ७ ॥ नालच्छेदनात्पूर्वं शिशौ मृते मातुर्दशाहम् ॥ पित्रादिसपिंडानां त्रिरात्रं जननाशौचं मृताशौचं तु नास्ति ॥ ८ ॥ नालच्छेदादूर्ध्वं शिशुमरणे दशाहं जननाशौचं सर्वेषां सपिंडानामस्ति ॥ मृताशौचं तु नास्ति ॥ ९ ॥ दशाहानंतरं नामकर-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

णात्प्राक्शिशुमरणे स्नानमात्रेण सपिंडानां शुद्धिः॥ मातापित्रोस्त्रिरात्रं पुत्रमृतौ ॥ कन्यामृतौ तु एकाहः ॥ नाम्नः पूर्वं खननमेव नित्यं नोदकदानादि ॥ अलंकरणं तु सर्वत्र भवति ॥ १० ॥ नामकरणोत्तरं वर्षपर्यंतं दाहखननयोर्विकल्पः ॥ ११ ॥ नामोत्तरं दंतोत्पत्तेः प्राक् पुत्रमरणे दाहे सपिंडानामेकाहः ॥ खनने तु स्नानाच्छुद्धिः ॥मातापित्रोरुभयत्रापि त्रिरात्रम् ॥कन्यामृतौ तु त्रिपुरुषसपिंडानां उभयत्रापि स्नानाच्छुद्धिः ॥ मातापित्रोरुभयत्रापि एकाहः १२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दंतोत्पत्तेरूर्ध्वं वर्षत्रयपर्यंतं पुत्रमरणे दाहे खनने वा सपिंडानामेकाहः ॥ मातापित्रोस्त्रिरात्रम् ॥ कन्यामृतौ तु त्रिपुरुषसपिंडानां, उभयत्रापि स्नानाच्छुद्धिः ॥ मातापित्रोस्त्रिदिनमाशौचम् ॥ १३॥ प्रथमवर्षादौ कृतचूडस्य पुत्रस्य मरणे पित्रादिसपिंडानां त्रिदिनमाशौचं नियतम् ॥ दाहश्च नियतः ॥ १४ ॥ त्रिवर्षोर्ध्वं कृतचूडस्याकृतचूडस्य वा पुत्रस्य मरणे प्रागुपनयनात्पित्रादिसपिंडानां त्रिदिनमाशौचम् ॥ दाहश्च नियतः ॥उदकदानादि तूष्णी-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

म् ॥ कृतचूडस्य भूमौ पिंडदानं तूष्णीम् ॥ १५ ॥
कन्यायाः वर्षत्रयानंतरं वाग्दानात्प्राङ्मरणे त्रिपुरु-
षसापिंडानामेकाहः ॥ मातापित्रोस्त्रिदिनम् ॥ दाहो-
दकदानादि तूष्णीमेव ॥ १६ ॥ वाग्दानोत्तरं वि-
वाहात्प्राङ्मृतासु कन्यासु भर्तृकुले पितृकुले च स-
प्तपुरुषसापिंडानां पित्रादीनां सर्वेषां त्रिदिनमाशौ-
चम् ॥ दाहोदकदानादितूष्णीम् ॥ १७ ॥ उपनय-
नोत्तरं मृतस्य पुरुषस्य सर्वेषां सापिंडादीनां विप्रा-
णां दशाहम् ॥ क्षत्रियाणां द्वादशाहम् ॥ वैश्या-

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नां पंचदशाहम् ॥ शूद्राणां मासम् ॥ सच्छूद्राणां मासार्धम् ॥ सोदकानां त्रिरात्रम् ॥ गोत्रजानां स्नानाच्छुद्धिः ॥ १८ ॥ विवाहोर्ध्वं कन्यायाः पितृगृहे मरणे मातापित्रोः सोदरभ्रातुश्च त्रिरात्रम् ॥ पितृव्यादीनामेकाहः ॥ १९ ॥ ऊढायाः कन्यायाः पितृगृहे प्रसवे मातापित्रोस्त्रिरात्रम्॥सोदरस्यैकरात्रम् ॥ पितृव्यादीनामेकाह इति केचित् ॥२०॥पतिगृहे प्रसवे पित्रादीनामाशौचं नास्ति ॥ २१ ॥ ऊढायाः कन्यायाः पतिगृहे मरणे मातापित्रोस्त्रिरात्र-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

म् ॥२२॥ मातापित्रोर्मरणे ऊढपुत्र्यास्त्रिरात्रं दशा-
हांतम्॥ दशाहोर्ध्वं कालांतरे वत्सरांतेऽपि पक्षिणी॥
अत्रैव अतिक्रांताशौचं ब्राह्मणवचनाद्भवति ना-
न्यत्र ॥ २३ ॥ भ्रातृभगिन्योः परस्परगृहमरणे प-
रस्परस्य त्रिरात्रम् ॥ गृहांतरमृतौ तु परस्परस्य प-
क्षिणी ॥ २४ ॥ मातुलमरणे भगिन्यपत्यस्य पक्षि-
णी उपकारिमातुलमरणे तु त्रिरात्रम् ॥ २५ ॥ मा-
तुलान्या मरणे भर्तृभगिन्यपत्यस्य पक्षिणी ॥२६ ॥
उपनीतभागिनेयमरणे मातुलस्य मातुलभगिन्या-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्च त्रिरात्रम् ॥ अनुपनीते मृते तु मातुलस्य मातुलभगिन्याश्च पक्षिणी ॥ २७ ॥ मातामहमरणे दुहित्रपत्यस्य त्रिरात्रम् ॥ २८ ॥ अनुपनीतदौहित्रमरणे मातामहस्य मातामह्याश्च पक्षिणी ॥ उपनीते मृते तु त्रिरात्रमिति केचित् ॥ २९ ॥ मातामह्यां मृतायां दुहित्रपत्यस्य पक्षिणी ॥ ३० ॥ श्वश्रूश्वशुरयोर्मृतौ सत्यां जामातुः सन्निधौ त्रिरात्रमसन्निधौ पक्षिणी ॥ ग्रामांतरे चैकरात्रम् ॥ ३१ ॥ जामातरि मृते तु श्वश्रूश्वशुरयोः स्नानाच्छुद्धिः ॥ ए-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

काहमाशौचमिति केचित् ॥ ३२ ॥ श्यालके मृते भगिनीभर्तुरेकाहः । श्यालकसुतमरणे तु स्नानमात्रम् ॥ ३३ ॥ पितृष्वसरि मृतायां भ्रात्रपत्यस्य पक्षिणी ॥ ३४ ॥ मातृष्वसरि मृतायां स्वस्रपत्यस्य पक्षिणी ॥ ३५ ॥ आत्मनः पितृष्वसृमातृष्वसृमातुलपुत्राः आत्मबांधवाः॥पितुः पितृष्वसृमातृष्वसृमातुलपुत्राः पितृबांधवाः ॥ मातुः मातृष्वसृपितृष्वसृमातुलपुत्राः मातृबांधवाः ॥ एते त्रिविधा बांधवाः ॥ बंधुत्रये एतेषु मृतेषु पक्षिणी॥पितृष्वस्रा-

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिकन्यानामूढानां मरणे एकाहः ॥ दत्तकमृतौ तु पूर्वापरपित्रोस्त्रिरात्रम् ॥ सपिंडानामेकाहः ॥३६॥ पूर्वापरपित्रोर्मृतौ दत्तकस्य त्रिरात्रम् ॥ ३७ ॥ दत्तकस्य पुत्रपौत्राणां मरणे जनने वा सपिंडानामेकाहः ॥ ३८ ॥ सपिंडे पुत्रीकृते दत्तके मृते तु सपिंडानां दशाह एव ॥ ३९ ॥ आचार्यमरणे शिष्यस्य त्रिरात्रम् ॥ तत्पुत्रपत्न्योर्मरणे एकाहः ॥ उपनीयाध्यापक आचार्य इत्युच्यते ॥ वेदैकदेशाध्यापक उपाध्यायः ॥ तन्मरणे शिष्यस्यैकरात्रम्॥४०॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिष्यस्योपनीतस्य मरणे गुरोस्त्रिरात्रम् ॥ परोपनीतस्य मरणे तु एकरात्रम् ॥ ४१ ॥ सहाध्यायिनो मृतौ एकग्रामीणयोरनूचानश्रोत्रिययोर्मृतौ तु चैकाहः ॥ सांगवेदाध्यायी अनूचानः ॥ वेदमात्राध्यायी श्रोत्रियः ॥ अध्ययनशब्दार्थस्यार्थज्ञानपर्यवसायित्वं न्यायसिद्धम् ॥ ४२ ॥ असपिंडस्यापि श्रोत्रियस्य मैत्रादिसंबंधस्य यद्गृहे मरणं तद्गृहस्वामिन एकरात्रम् ॥ ४३ ॥ वानप्रस्थे यतौ षंढे च मृते युद्धे च मृते सपिंडानां स्नानमात्रम् ॥ ४४ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथातिक्रांताशौचम् ॥ तत्र जननेऽतिक्रांताशौचं नास्ति ॥ पितुः स्नानं तत्रापि भवति ॥ मृतके तु अनुपनीतमरणादिनिमित्तकत्रिरात्रादिषु भगिनीमातुलादिमरणनिमित्तकत्रिरात्रादिषु चातिक्रांताशौचं नास्ति ॥ किंतु दशाहादिमृताशौचविषयमेव ॥ ४५ ॥ दशाहमध्ये जनने मरणे ज्ञाते पुत्रादीनां च सर्वेषां शेषेणैव शुद्धिः ॥ संस्कारमपि शेषेणैव समापयेत् ॥ अस्थिपर्णशरसंस्कारमपि शेषेणैव समापयेत् ॥ ४६ ॥ आद्यत्रिरात्रमध्ये समा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नोदकमरणे ज्ञाते समानोदकानां शेषेणैव शुद्धिः ॥ त्रिरात्रेऽतिक्रांते तु दशाहमध्ये ज्ञातेऽपि नाशौचं किंतु स्नानमात्रम् ॥ अयमेव न्यायः मातुलादित्रिरात्रादिषु ज्ञेयः ॥ ४७ ॥ मातापित्रोर्मरणे दूरदेशेऽपि संवत्सरांतरमपि श्रवणे पुत्रो दशाहादिपूर्णमेवाशौचं कुर्यात् ॥ ४८ ॥ स्त्रीपुंसयोः परस्परमरणे परस्परं देशांतरे वत्सरांतेऽपि पूर्णं दशाहादि भवति ॥४९॥ सपत्नीषु परस्परमृतौ परस्परस्य देशकालाद्यनपेक्ष्य दशाहं पूर्णमेवाशौचं भवति ॥५० ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सापत्नमातुर्मरणे संवत्सरोर्ध्वमपि देशांतरेऽपि त्रिरात्रम् ॥ ५१ ॥ औरसपुत्रे मृते संवत्सरोर्ध्वमपि मातापित्रोस्त्रिरात्रम् ॥ ५२ ॥ दशाहोर्ध्वमेकदेशे ज्ञातिमरणे ज्ञाते मासत्रयपर्यंतं त्रिरात्रम् ॥ षण्मासपर्यंतं पक्षिणी ॥ नवमासपर्यंतं एकदिनं तदनंतरं स्नानमात्रमिति वृद्धवासिष्ठः ॥ पक्षत्रयपर्यंतं त्रिरात्रम् ॥ षण्मासपर्यंतं पक्षिणी ॥ वर्षपर्यंतमेकरात्रम् ॥ तदूर्ध्वं स्नानमात्रमिति माधवे देवलः ॥ अत्रापदनापद्विषयत्वेन व्यवस्था द्रष्टव्या ॥ ५३ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दशाहोर्ध्वं देशांतरे ज्ञातिमरणे ज्ञाते त्रिपक्षपर्यंतं त्रिरात्रम् ॥ ततो मासषट्कपर्यंतं अहोरात्रम् ॥ ततो वर्षपर्यंतं दिवा श्रवणे आसायं रात्रिश्रवणे आप्रातराशौचम् ॥ वत्सरांते तु स्नानाच्छुद्धिः ॥ इदं सर्वमतिक्रांताशौचं सर्ववर्णसाधारणम् ॥ अत्र देशांतरे ज्ञातिमृते ज्ञाते स्नानाच्छुद्धिरिति केचित् ॥ तन्माधवोदाहृतविष्णुस्मृत्यज्ञानविलसितमिति ज्ञेयम् ॥ देशांतरं तु विप्रस्य विंशतियोजनांतरं क्षत्रियस्य चतुर्विंशतियोजनांतरं वैश्यस्य सच्छूद्रस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

च त्रिंशद्योजनांतरमसच्छूद्रस्य षष्टियोजनांतरं ज्ञेयम्॥ पक्षांतराणि तु उक्तपक्षानुसारेण ज्ञातव्यानि ॥ ५४ ॥ अत्रायं निष्कर्षः ॥ यानि एकगोत्रविषयकजननमरणातिक्रांताशौचानि तानि जायापतिभ्यामुभाभ्यामविशेषेणानुष्ठेयानि ॥ यानि पुनर्भगिनीमातुलादिभिन्नगोत्राशौचानि तेषु जायापतिमध्ये यत्संबंधं यत्तत्तेनैवानुष्ठेयं नोभाभ्यामिति ५५ आहिताग्नेर्मंत्रवद्दाहदिनमारभ्य पुत्रादिभिराशौचं कार्यम् ॥५६॥ आहिताग्नौ प्रोषिते मृते मंत्रवद्दाहा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्पूर्वं पुत्रादीनां नाशौचं संध्यादिकर्मलोपश्च नास्ति
॥ ५७ ॥ अनाहिताग्नेस्तु मरणदिनमारभ्य पुत्रादि-
भिराशौचं कार्यम् ॥ ५८ ॥ अथ रात्रौ जनने मरणे
वा रात्रिं त्रिभागां कृत्वाऽद्यभागद्वये चेत्पूर्वदिनं तृ-
तीयभागे चेदुत्तरदिनमारभ्याशौचं कार्यम् ॥ अर्ध-
रात्रात्प्राक् पूर्वदिनं परत उत्तरदिनम् ॥ प्राक्सूर्यो-
दयात्पूर्वं दिनम् ॥ ऊर्ध्वमुत्तरमिति ॥ पक्षत्रयं देशां-
तरतो व्यवस्थितम् ॥ महाराष्ट्रदेशे तु आद्यपक्ष ए-
व चरति ॥५९॥ इति त्र्यंबकीये आशौचनिर्णयः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथाशौचसंपाते निर्णयः ॥ तत्र दशाहमृतके द-
शाहं ततो न्यूनं वा मृतकमुपस्थितं भवति तदा पू-
र्वशेषेण शुद्धिः ॥ ६० ॥ दशाहे सूतके दशाहं ततो
न्यूनं वा सूतकं पतति तदा पूर्वशेषेण शुद्धिः॥६१॥
सूतकमध्ये दशाहं न्यूनं वा मृतकं पतति तस्य न
पूर्वेण शुद्धिः ॥ तत्र सूतकस्यावशिष्टत्वे तु मृतकस-
माप्त्या सूतकमपि समापनीयम् ॥ ६२ ॥ त्र्यहादि-
रूपे मृतके सूतके च दशाहमृतकपाते च दशाहसू-
तकपाते च न पूर्वेण शुद्धिः ॥६३॥ मृतके सूतकस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समन्यूनस्य वा संपाते पूर्वेण शुद्धिः॥६४॥अधिकस्यापि सूतकस्य शुद्धिरिति शुद्धिविवेककारः ॥६५॥ पूर्वाशौचमध्ये उत्पन्नमपि पूर्वाशौचोत्तरं ज्ञातं चेदुत्तरमेव कार्यम् ॥ दशाहांत्यरात्रौ यदि दशाहं सूतकं पतति तदा दिनद्वयमधिकं कार्यम् ॥ सा रात्रिः परेद्युश्च ॥ ६६ ॥ दशाहांत्यरात्रिचतुर्थयामे यदि दशाहमाशौचं पतेत्तदा दिनत्रयमधिकं कार्यम् ६७ त्र्यहाद्याशौचानां परस्परं रात्रिशेषे संपाते पूर्वेणैव शुद्धिः न द्व्यहादिवृद्धिः ॥ ६८ ॥ वर्धिते द्वित्रादिन-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मध्ये आशौचांतरसंपाते च अधिकस्य न पूर्वेण
शुद्धिः ॥ समन्यूनयोस्तु पूर्वेण शुद्धिः॥ ६९ ॥ सपिं-
डाशौचेन मातृपितृभर्तृणामाशौचं नापैति ॥७०॥
मात्राशौचमध्ये पित्राशौचपाते पूर्वशेषेण शुद्धिः ॥
॥ ७१ ॥ पितुः संपूर्णाशौचेन शुद्धिरित्यन्ये॥ तेषां
शेषपदस्य पूर्णपरत्वं लाक्षणिकम् ॥ पित्राशौचम-
ध्ये मातृमरणे तु पित्राशौचं समाप्य पक्षिणीम-
धिकं कुर्यात् ॥ ७२ ॥ इदं दशमरात्रेरर्वाग्भवति ॥
दशमरात्र्यां तद्रात्रिचतुर्थयामे तु मातृमरणे तु द्व्य-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हं त्र्यहं वेति न पक्षिणी ॥ ७३ ॥ मातुर्भर्त्रा सहा-
न्वारोहणे तु नाधिका पक्षिणी ॥ पूर्वाशौचेन शुद्धिः
॥ ७४ ॥ सूतिकायां अग्निदे प्रेतपुत्रेषु च नास्ति ॥
अत्र प्रेतपुत्रेति पुनर्ग्रहणं वचनांतरानुरोधेन ॥७५
सूतके मृतकपाते न पिंडदाने प्रतिबंधः ॥ मृतके
सूतकसंपाते जातकर्मादि तदानीमाशौचांते वा
कुर्यात् इति विकल्पः ॥ ७६ ॥ मातुर्वाधिका पक्षि-
णी तन्मध्ये पितुरेकादशाहं श्राद्धं कुर्यात् ॥ ७७ ॥
शवस्पर्शे दिवा चेन्नक्षत्रदर्शनाच्छुद्धिः ॥ रात्रौ चे-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

त्सूर्यदर्शनात् ॥ तदन्नाशने तद्गृहवासे यावत्तेषामा-
शौचं तावदाशौचम् ॥७८॥ संसर्गाशौचे कर्माधि-
कारो नास्ति ॥ किंतु अस्पृश्यत्वमात्रम् ॥ ७९ ॥
तद्गृह्याणां तद्द्रव्याणां नाशौचसंबंधः ॥ ८० ॥ स्ने-
हेन सवर्णनिर्हारे तदन्नाशने तद्गृहवासे च दशाहः ॥
तदन्नानशने तद्गृहवासे त्र्यहः ॥ ८१ ॥ अगृहवासे-
ऽन्नाभक्षणे निर्हरणमात्रे कृते चैकाहः ॥ ८२ ॥ भृ-
तिग्रहणे सवर्णनिर्हारे दशाहे च तज्जात्याशौचं द-
शाहादि ॥ ८३ ॥ विजातीयनिर्हारे विजातीयदाहे

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

च शवजातीयमाशौचम् ॥ भृतिग्रहणे विजातीय-
निर्हारे दाहे च शवजातीयाद्विगुणम्॥८४॥ सोदक-
निर्हारे दशाहः ॥ ८५॥ असपिंडालंकरणे अज्ञाना-
दुपवासः अशक्तौ स्नानम् ॥ ज्ञानतः पादकृच्छ्रम्
॥ ८६ ॥ धर्मार्थमनाथशवसवर्णनिर्हरणे क्रियाकर-
णेऽग्निदाने च द्विजस्य अनंतफलम् ॥ स्नानाच्छुद्धिः
प्राणायामोऽग्निस्पर्शश्च ॥ ८७ ॥ धर्मार्थमनाथसव-
र्णनिर्हरणादावपि मातुलादिसंबंधे सति त्रिरात्रमा-
शौचम् ॥८८॥ अनुगमने तु सपिंडे न दोषः ॥ अ-

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सपिंडेऽपि अनाथक्रियायां न दोषः ॥ ८९ ॥ समो-
त्कृष्टवर्णीयशवानुगमने स्नात्वा हुताशं स्पृष्ट्वा स-
र्पिः प्राश्य पुनः स्नात्वा प्राणायामं कुर्यात् ॥ ९० ॥
हीनवर्णशवानुगमने क्षत्रिये एकाहः ॥ वैश्ये पक्षि-
णी ॥ शूद्रे त्रिरात्रम् ॥ पूर्ववत्स्नानादि च ॥ ९१ ॥
ब्रह्मचारिणः सपिंडमरणे नाशौचम् ॥ नान्यस्य
निर्हारदाहाद्यौर्ध्वदेहिकेऽधिकारः ॥ ९२ ॥ तत्करणे
पुनरुपनयनम् ॥ कृच्छ्रप्रायश्चित्तम् ॥ ९३ ॥ ब्रह्म-
चारिणः पितृमात्राचार्योपाध्यायमातामहानामंत्य-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कर्मकरणे न दोषः ॥ तत्र दशाहमस्पृश्यत्वलक्ष-
णमाशौचम् ॥ ९४ ॥ दशदिनं संध्याग्निकार्यादिक-
र्माधिकारोऽस्त्येव ॥ ९५ ॥ एकदिनमस्पृश्यत्वमिति
माधवः ॥ ९६ ॥ पित्राद्याशौचेऽपि नाशौचिनामन्नं
ब्रह्मचारी भक्षयेत्॥भक्षणे तु पुनरुपनयनम्॥९७॥
ब्रह्मचारिणः पित्राद्यंतकर्माकरणे तु पित्रादिमरणे-
ऽपि नाशौचम् ॥ ९८ ॥ समावर्तनोत्तरं पूर्वमृतानां
त्रिदिनाशौचं कार्यमेव ॥ ९९ ॥ कृतजीवच्छ्राद्धेन
किमप्याशौचं न कार्यमिति हेमाद्रिः ॥ १०० ॥ वा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नग्नस्थयतिपतितयोरपि किमप्याशौचं न कार्यम् ॥ तेषामपीतरैर्न कार्यम् ॥ १ ॥ परेषां सर्ववर्णानामौर्ध्वदेहिककरणे तज्जात्याशौचं कृत्वा कृच्छ्रत्रयाच्छुद्धिः ॥ २ ॥ हीनवर्णौर्ध्वदेहिककरणे तु शवजातीयमाशौचं कृत्वा कृच्छ्रत्रयद्वैगुण्याद्यूह्यम् ॥ ३ ॥ आहिताग्नेरस्थिदाहे प्रतिकृतिदाहे वा सर्वसापिंडानां दशाहाद्याशौचम् ॥४॥ अनाहिताग्नेस्तु अस्थिदाहे पर्णशरदाहे च पत्नीपुत्रयोः पूर्वमगृहीताशौचयोः दशाहिकं पूर्णमेव ॥ ५ ॥ गृहीताशौचयोस्तु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तयोरपि संस्कारकाले त्रिरात्रम् ॥ पत्नीसंस्कारे पत्युश्चैवम् ॥ सपत्न्योर्मिथश्चैवम् ॥ ६ ॥ अन्यसपिंडानां पूर्वमगृहीताशौचानां अनाहिताग्निसंस्कारकाले त्रिरात्रम् ॥ पूर्वगृहीताशौचानां तु सपिंडानां संस्कारकाले स्नानमात्रम् ॥ ७ ॥ इदं त्रिरात्रादिकं दशाहोर्ध्वं संस्कारकरणे ज्ञेयम् ॥ दशाहमध्ये तु शेषदिवसैरेवाशौचासिद्धेरुक्तत्वात् ॥ ८ ॥ रजस्वलायास्तु विंशतिदिनोत्तरं प्रायशो रजोदर्शनं भवति तस्याः सप्तदशदिनपर्यंतं पुना रजोदृष्टौ स्नानमात्र

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

म् ॥ अष्टादशे एकरात्रम् ॥ एकोनविंशे द्विदिनम् ॥ विंशतिप्रभृति दिनत्रयम् ॥९॥ यस्यास्तु विंशति-दिनादर्वाक्प्रायशो रजोदर्शनं भवति तस्याः दश-दिनपर्यंतं स्नानमात्रम् ॥ एकादशे एकरात्रं द्वादशे द्विरात्रं त्रयोदशादारभ्य त्रिरात्रम् ॥ ११० ॥ इति त्र्यंबकीयेऽशौचनिर्णये दशोत्तरशतोंऽशः ॥११०॥ अत्र मूलवचनानि मिताक्षरादिनिबंधेभ्यो ज्ञेया-नि ॥ तानि विस्तरभिया बालानां दुरधिगमत्वाच्च न लिखितानि ॥ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इदं पुस्तकं मुंबय्यां निर्णयसागराख्यमुद्रणयन्त्राल-
याधिपतिना स्वकीये मुद्रणयन्त्रे मुद्रितम् ॥
शकाब्दाः १८०९.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आर्याभिविनयः समाप्तः

224,7

42954

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुकुल कांगड़ी विश्वविद्यालय,
हरिद्वार
224
6

पुस्तक लौटाने की तिथि अन्त में अङ्कित है। इस तिथि को पुस्तक न लौटाने पर छै दस नये पैसे प्रति पुस्तक अतिरिक्त दिनों का अर्थदण्ड लगेगा।

42954

१००००.६५६।

RA 224,AAS-A
42954

Entered in Database
Signature with Date

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुस्तकालय, गुरुकुल कांगड़ी विश्वविद्यालय,
हरिद्वार।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar